श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि मङ्गलम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि मङ्गलम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

राजगोपालकृष्णाय राजराजनुताङ्घ्रये।
राजीवदलनेत्राय राजवक्त्राय मङ्गलम्॥ 1 ॥

धनुष्पुरनिवासाय धन्विनव्यपुरीभुवः।
भुवो मानसवासाय राजगोपाय मङ्गलम्॥ 2 ॥

धराधरकिशोराय धाराधरसमत्विषे।
शरासनपुरीपुण्यधराधाराय मङ्गलम्॥ 3 ॥

कृष्णाम्बुदनिकाशाय कृष्णारक्षणकारिणे।
कृष्णातीरविहाराय कृष्णाय मम मङ्गलम्॥ 4 ॥

आकुलं गोकुलं पातुं विपुलाचलधारिणे।
श्रीगोपकुलपालाय गोपबालाय मङ्गलम्॥ 5 ॥

धनुर्भञ्जननादेन कंसकम्पप्रदायिने।
धनुष्पत्तननाथाय राजगोपाय मङ्गलम्॥ 6 ॥

देवकीपरमानन्ददायिने मायिने परम्।
देवानामपि सेव्याय राजगोपाय मङ्गलम्॥ 7 ॥

sundarkidambi.com

रुक्मिणीसत्यभामाभ्यां भूषाभ्यां निजपार्श्वयोः।
कलापिकण्ठकान्ताय कृष्णाय मम मङ्गलम्॥ 8॥

चापपत्तननाथाय पापपत्तनभेदिने।
राधावदनतृष्णाय कृष्णाय मम मङ्गलम्॥ 9॥

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैः पूज्याय राजगोपाय मङ्गलम्॥ 10॥

कविश्रीनिधिना क्लृप्तं राजगोपालमङ्गलम्।
पठतां भविता नित्यं नित्यश्रीर्नित्यमङ्गलम्॥ 11॥

॥ इति श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि मङ्गलं समाप्तम्॥

sunder kidāmbi prapatti dot com sunder kidāmbi